द्वादश राशि बृहस्पति विचार

पृ. सं. ३ 05730

31

५२१

द्वादश राशी बृहस्पति विचार:

पृ. ३

clg

3/

THE FOREIGN SERVICE
OF THE
UNITED STATES OF AMERICA

OFFICIAL BUSINESS

UNITED STATES INFORMATION SERVICE
54, JANPATH, NEW DELHI, INDIA.

BOOK POST

5730.

५२९
२८-११-५७

द्वादश राशि बृहस्पति विचार:
पृ. सं. ३

Mr. Vagishvar Vidyalankar,
univ. Library,
P.O. Gurukula, Kangri,
Hardwar.

D-PC

INDIA POSTAGE 521 U
001-
ANNAS

U.S. EMBASSY-D 268
NEW DELHI
3 IV 57

भोजनं कथयति॥ इति मध्याह्नचक्रं समाप्तम्॥ अपराह्णे पूर्वतो रमते काकः अभ्यागमनं कथयति अपराह्णे नैरृत्यां रमते का-
कः तदा वृषभागमनं कथयति अपराह्णे वारुण्यां रमते काकः तदा विजयवार्त्ता कथयति अपराह्णे वायव्यां रमते काकः तदा नष्ट-
द्रव्यं कथयति अपराह्णे सौम्यां रमते काकः तदा ताम्बूलभोजनं कथयति अपराह्णे ऐशान्यां रमते काकः तदा मनःसिद्धिं क-
थयति अपराह्णे ब्रह्मस्थाने रमते काकः तदा शुभवार्त्ता कथयति। इति अपराह्णचक्रं समाप्तम्॥ अस्तमने पूर्वतो रमते
काकः तदा ज्वरं कथयति।१। अस्तमने आग्नेय्यां रमते काकस्तदा शत्रुभयं कथयति। वाह्निमरणं च॥२॥ अस्तमने याम्यां
रमते काकः तदा शत्रुभयं कथयति॥३॥ अस्तमने नैरृत्यां रमते काकस्तदा मनःसिद्धिं कथयति॥४॥ अस्तमने वा-
रुण्यां रमते काकः तदा स्त्रिय आगमनं॥५॥ अस्तमने वायव्यां रमते काकः तदा अभ्यागमनं कथयति॥६॥ अस्तमने सौ-
म्यां रमते काकस्तदा शुभवार्त्ता कथयति॥७॥ अस्तमने ऐशान्यां रमते काकः तदा व्याधिरोगं कथयति॥८॥ अस्तमने
ब्रह्मस्थाने रमते काकस्तदा मनःसिद्धिं कथयति॥९॥ इति अस्तमनसिद्धिचक्रं समाप्तम्॥ वृद्धास्य पूर्वशाखायां
रमते काकः गृहं कुरुते भूमिवृद्धिं देमं मारोग्यं स्मजन्म संपद॥ आग्नेय्यां दिशि शाखायां वायसः कुरुते गृहं। दुर्भिक्षं
तत्र जानीयान्न च वर्षति माधवः॥२॥ दक्षिणदिशि शाखायां वायसः कुरुते गृहं हाहाकारं महाघोरं दुर्भिक्षं च भ-
वेद्ध्रुवम्॥३॥ नैरृत्यां दिशि शाखायां वायसः कुरुते गृहं। द्वौ मासौ वर्षते मेघा देशो वृजायते ध्रुवम्॥४॥ वारु-

ॐ श्रीगणेशाय नमः ॥ उदये पूर्वेतो रमते काकः मनः सिद्धिं कथयति आग्नेय्यां रमते काकः शत्रुविनाशं कथयति २
उदये याम्यां रमते काकः अभ्यागमनं कथयति ।३।उदये नैऋत्यां रमते काकः मनः सिद्धिं कथयति ।४।उदये पश्चि
मायां रमते काकः मनः सिद्धिं कथयति ।५।उदये वायव्यां रमते काकः अर्थागमनं कथयति ।६। उदये सोम्यां रमते काकः
नष्टद्रव्यं कथयति ।७।उदये ईशान्यां रमते काकः स्त्रियः आगमनं कथयति ।८।उदये ब्रह्मस्थाने रमते काकः अभ्याग
मनं कथयति ।९॥ इति उदयचक्रं समाप्तम् ॥ प्रथमे पूर्वे [illegible] रमते काकः स्त्रीआगमनं कथयति ।१। प्रथमे प्र
हरे याम्यां रमते काकः असंग सुखमाप्नोति २ प्रथमे प्रहरे नैऋत्यां रमते काकः अर्थागमनं कथयति ।३ प्रथमे प्र
हरे वारुण्यां रमते काकः स्त्रीआगमनं कथयति ।४। प्रथमे प्रहरे वायव्यां रमते काकः तदा राजागमनं कथयति ।५।
प्रथमे प्रहरे सोम्यां रमते काकः तदा सिद्धिं कथयति ॥६। प्रथमे प्रहरे ईशान्यां रमते काकः मित्र अभीष्ट मेलनं करो
ति ॥८॥ इति प्रथमप्रहरचक्रं समाप्तम् ॥ मध्याह्ने पूर्वे रमते काकः तदाग्नेय्यां रमते काकस्तदा कलहवार्त्ता कथ
यति ।२ ॥मध्याह्ने याम्यां रमते काकस्तदा वृषभागमनं कथयति ।३॥ मध्याह्ने नैऋत्यां रमते काकः तदा पशुप्रसवं कथ
यति। मध्याह्ने वारुण्यां रमते काकः तदा स्त्रीआगमनं कथयति॥ मध्याह्ने वायव्यां रमते काकः तदा राजागमनं कथ
यति ॥ मध्याह्ने ऐशान्यां रमते काकः तदा विद्धं मरणं च संति ॥८॥ मध्याह्ने ब्रह्मस्थाने रमते काकस्तदा रुचिर

ली दिशि पिप्पलवायां वायसः कुरुते ग्रहं ननद्यहिं विजानीयात् कथितं वायसेन तत् ॥५॥ वायव्यां दिशि पिप्पलकोणे वायसः कुरु
ते ग्रहं वातवृष्टिं विजानीयात् कथितं वायसेन तत् ॥६॥ उत्तरदिशि पूर्णवायां वायसः कुरुते ग्रहं मध्यवृष्टिं विजानीयान्
धममस्मसंपदः ।७॥ ईशान्यां दिशि शाल्मल्यां वायसः कुरुते ग्रहं मेघांश्रोलोहितालवकानत्रजन्ते चमुष्यति । अन्नवृष्टिं
विजानीयात् स्थलेवीजानि वापयेत् ॥ यदाग्रधमशालायां वायसः कुरुते ग्रहं । मनुष्याणां रमयं विंद्यान्न चवर्षेति माध
वः ॥१०॥ वाल्मीकोपरि वा भूमौ वायसः कुरुते ग्रहं मनुष्याणां रभयं विंद्यान्न च वर्षति माधवः ॥११॥ पक्ककृते ग्रहं कु
र्यान्नदा चौरभयं भवेत् । राजाविग्रहमाप्नोति महारिष्टमयं भवेत् ॥१२॥ अथान्यं संप्रवक्ष्यामि वायसानां तु चेष्टितं
अमे वाप्युभे वापि यथा प्रासाद निश्चयः ॥१॥ एकैनैव तु समं विंद्यात् द्वाभ्यां चैवं तु मध्यमं तृतीये तु समारोग्यं वा
धिरोगं चतुष्टये ।२॥ ॐ नमो भगवते उड्डीश विरलि काकः स्वाहा । अयं मंडलमंत्रः । ॐ नमो ब्रह्मस्वरायरौद्रायपुंड
रीकाय स्वाहा । ॐ काकरुद्राय स्वाहा काककुमाराय स्वाहा पिंडमोचनमंत्रः अनेन मंत्रेण सप्ताभिमंत्रितं कृत्वा
पिंडत्रयं स्थाप्यते इति श्री उड्डीशशास्त्रे योगायोगाधिकारः समाप्तः । अथ काकशाकुनं लिख्यते । शालापूनं गृहीत्वा तु
घृतेन सह मिश्रितं तस्य पिंडत्रयं कृत्वा मंडले तत्र धारयेत् चतुर्भं प्रथमे पिंडे मध्यमे चतुरंगमे गृते च हस्तिने कृ
त्वा शुभाशुभं निरीक्षयेत् ॥२॥ प्रथमे च जयं विंद्यान् मध्यमे चतुरंगमे हस्तेन भयं कुर्यात् शुभाशुभं निरीक्षयेत्
विवाहनिमित्तं पिंडत्रयं स्थापयेत् प्रथमे गुडोदनं पिंडं यत् काक उपविश्यति तदा शुभं तंदुले चान्यतः शोभनं नि
ष्फलं च शोभनं ॥४॥ यात्रानिमित्तेपिंडत्रयं स्थापयेत् प्रथमे धान्यं द्वितीये माषः तृतीये अंगारः धान्यनष्टा

मनं माषेमध्यमं शृंगारे मरणं ॥ स्थाननिमित्ते पिंडत्रयं स्थाप्यते प्रथमे धान्यं द्वितीये चनकाः तृतीयं पात्रीयं धान्येन पूर्णमनं च
नके मध्यमं पात्री येनोर्च ६ ग्रामनिमित्ते पिंडत्रयं स्थाप्यते प्रथमे माषाः मध्यमे पुरुषाः तृतीये शृंगाराः माषे ग्रामगमनं पुरुषे
णास्थिरं शृंगारे मरणं ॥७॥ कुमारलनिमित्ते पिंडत्रयं स्थाप्यते प्रथमे तंडुलं द्वितीये माषः तृतीये शृंगारः तंडुले प्रेम भनं माषे
मध्यमं शृंगारे निकृष्टं ॥८॥ उत्तरनिमित्ते पिंडत्रयं स्थाप्यते प्रथमे गुडोदनं द्वितीये हरिद्रा तृतीये शृंगाराः गुडोदने पुत्रलाभः
हरिद्रायां दुहिता शृंगारे गर्भनाशनं ९ यात्राजयनिमित्ते पिंडत्रयं स्थाप्यते प्रथमे नदी द्वितीये पर्वतः तृतीये हस्तिनः अ
नागमे नद्याः आगमेन पर्वतः संयोगो हस्तिनः ॥१०॥ जयनिमित्ते पिंडत्रयं स्थाप्यते प्रथमे सिंहः द्वितीये हस्तिनः तृतीये ख
रः सिंहे जयः हस्तिनः संधिः खरे भंगः ॥११॥ धान्यनिमित्ते पिंडत्रयं स्थाप्यते प्रथमे धान्य द्वितीये चनका तृतीये पिंड
के गंधान्ये उत्तमं चनके मध्यमं कंविअधमं ॥१२॥ वृष्टिनिमित्ते पिंडत्रयं स्थाप्यते प्रथमे तोयं द्वितीये मृत्तिका
तृतीये शृंगारः पानीयेन पूर्णं वर्षति मृत्तिकायां पव्वेकम छोवर्षति शृंगारे न वर्षति ॥१३॥ ओं इलि किलि निस्वाहा
ओं आदित्यमंडले रिति टः स्वाहा पिंडत्रयाभिमंत्रणमंत्रः ॥ इति काकशकुनानि ॥ अथ अर्घकांड कथ्यते ॥ यदा
विशाखायां बृहस्पतिर्याति तदा धान्य महर्घता भवति ॥१॥ यदा मूले बृहस्पतिर्याति तदा देशे न वर्षति ॥२॥ यदा उत्तराषा
ढायां बृहस्पतिर्याति तदा गुडमहर्घता भवति ॥३॥ यदा कृत्तिकायां बृहस्पतिर्याति तदा धान्यमहर्घता ॥४॥ यदा पुनर्वसौ
बृहस्पतिर्याति तदा कर्पासमहर्घता ॥५॥ यदा श्लेषायां बृहस्पतिर्याति — महर्घता ॥६॥ यदा चित्रायां बृहस्पतिर्या
ति तदा धान्यमहर्घता ॥७॥ यदा स्वातौ बृहस्पतिर्याति तदा गोधनमहर्घता ॥८॥ इति बृहस्पतिविधिः ॥ राम ॥

तिलद्रा तिल गुड हिंगस्तुरि मिरिच पिप्पली जाती फल खग्रखरोट कर्पूर अगर पाटम्बर कुंकुम रसेन एतेषां संग्रहं कु
र्यात् नवमे मासे द्विगुणो लाभो भवति ।७। वृश्चिकराशौ यदा गतो बृहस्पतिस्तदा गोधूम चणक माषयव ज्ञाम हिषा:
गुडस्य संग्रहं कुर्यात् नवमे मासे द्विगुणो लाभो भवति ॥८॥ धनराशौ यदा बृहस्पतिस्तदा तिल अश्व स्वर्ण सीसा ताम्र
लोहा हारिद्रा कर्पास संग्रहमद्दा डिम सैंधव एतेषां संग्रहं कार्यं अष्टमे मासे त्रिगुणो लाभो भवति ॥९। मकरराशौ
यदा गतो बृहस्पतिस्तदा दुर्भिक्षं महारोगकं भयं स्वल्पपरित्यागं त जाम जामरणं कायस्थ सौडुकमर तां भ
वति ॥१०। कुम्भराशौ यदा बृहस्पतिस्तदा मासद्वयमध्ये कर्पास सर्षपौ जीरा धनियां मोच्या खंड तिलश्च जामोहा
हरीतकी मासद्वयमध्ये त्रिगुणो लाभो भवति ।११। मीनराशौ यदा गतो बृहस्पतिस्तदा सुभिक्षं भवति सर्वजं
नानामारोग्यं भवति सर्वोपद्रवनाशनं भवति संवत्सरे कपाव नसमहर्घं जामवति ॥ इति द्वादशराशि बृह
स्पतिविचार: ॥ शुभं भूयात् ॥ ॥ ॥ ॥ ॥ ॥

१८६६

यदाऽनुराधायां शुक्रो याति तदा धान्यमहर्घता सर्वमासान् यदा धनिष्ठायां शुक्रो याति तदा धान्यमहर्घता यदा पुनर्वसौ शु-
क्रो याति तदा कर्पासमहर्घता यदाऽश्लेषायां शुक्रो याति तदा धान्यमहर्घता इति शुक्रविचारः समाप्तः॥ यदा पूर्वाभाद्रप-
दायां घातिर्याति तदा माषतिलमहर्घता ॥१॥ यदाऽनुराधायां बुधो याति तदा धान्यमहर्घता ।२। यदा मृगशिरे रविबुधौ या-
ति तदा तिलमहर्घता ।३। इति बुधविचारः॥ यदा पूर्वाषाढायां केतुर्याति तदा सर्वधान्यसंग्रहं कुर्यात् पंचमे मासि
पुनर्विक्रीयते चतुर्गुणो लाभो भवति ।४। मिथुनराशौ यदा गच्छति बृहस्पतिस्तदा माससप्तमध्ये कर्पास गुडलो-
ह सुंठी मिरच पिप्पली वस्त्र पटोला धातकी जाती फल हिंदूर लोह गोधूमं मंजिष्ठा त्रिकुटा कर्पट कोद्रव उडद
कामोरतानि गृह्णंति पश्चाद्विगुणो लाभो भवति॥ कर्कराशौ यदा गतो बृहस्पतिस्तदा प्रथमे मासे दुर्भिक्षं भवति
समस्तधान्यमहर्घता गुड कर्पास हिंगु कुंकुम मंजिष्ठक जीरा कामठ एतेषां महर्घता भवति मासाष्टमध्ये चतुर्गु-
णो लाभो भवति। सिंहराशौ बृहस्पतिस्तदा समस्तधान्यसंग्रहं कुर्यात् कर्पास वृषभ संग्रहं ज्येष्ठआषाढम-
ध्ये द्विगुणो लाभो भवति ।५। कन्याराशौ यदा गतो बृहस्पतिस्तदा गुड धान्य गोधूम मसूर चणा उडद रंग मंजिष्ठा
कुंकुम कर्पूर एतेषां संग्रहं कुर्यात् माघफाल्गुनमध्ये द्विगुणो लाभो भवति तुलराशौ यदा गतो बृहस्प-